# saptashatIsArabhUtadurgAstotram

# સપ્તશતીસારભૂતદુર્ગાસ્તોત્રમ્

## Document Information

Text title : saptashatIsArabhUtadurgAstotram

File name : saptashatIsArabhUtadurgAstotram.itx

Category : devii, durgA, shatI, devI, saptashatI

Location : doc_devii

Author : rAmakRiShNabhaTTa kAshIkara

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 22, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સપ્તશતીસારભૂતદુર્ગાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

અથ ધ્યાનમ્ ।
યસ્યા દક્ષિણભાગકે દશભુજા કાલી કરાલા સ્થિતા
યદ્વામે ચ સરસ્વતી વસુભુજા ભાતિ પ્રસન્નાનના ।
યત્પૃષ્ઠે મિથુનત્રયં ચ પુરતો યસ્યા હરિઃ સૈરિભ-
સ્તામષ્ટાદશબાહુમમ્બુજગતાં લક્ષ્મીં સ્મરેન્મધ્યગામ્ ॥ ૧॥

ઇતિ ધ્યાનમ્ ॥

લં પૃથ્વ્યાત્મકમર્પયામિ રુચિરં ગન્ધં હમભ્રાત્મકં
પુષ્પં યં મરુદાત્મકં ચ સુરભિં ધૂપં વિધૂતાગમમ્ ।
રં વહ્ન્યાત્મકદપિકં વમમૃતાત્માનં ચ નૈવેદ્યકં
માતર્માનસિકાન્ગૃહાણ રુચિરાન્પઞ્ચોપચારાનમૂન્ ॥ ૧॥

ઇતિ મનસા સમ્પૂજ્ય પઠેત્ ।
કલ્પાન્તે ભુજગાધિપં મુરરિપાવાસ્તીર્ય નિદ્રામિતે
સઞ્જાતૌ મધુકૈટભૌ સુરરિપૂ તત્કર્ણપીયૂષતઃ ।
દૃષ્ટ્વા ભીતિભરાન્વિતેન વિધિના યા સંસ્તુતાઽઘાતયદ્
વૈકુણ્ઠેન વિમોહ્ય તૌ ભગવતી તામસ્મિ કાલીં ભજે ॥ ૧॥

યા પૂર્વં મહિષાસુરાર્દિતસુરોદન્તશ્રુતિપ્રોત્થિત-
ક્રોધવ્યાપ્તશિવાદિદૈવતનુતો નિર્ગત્ય તેજોમયી ।
દેવપ્રાપ્તસમસ્તવેષરુચિરા સિંહેન સાકં સુર-
દ્વેષ્ટૄણાં કદનં ચકાર નિતરાં તામસ્મિ લક્ષ્મીં ભજે ॥ ૨॥

સૈન્યં નષ્ટમવેક્ષ્ય ચિક્ષુરમુખા યોક્તું યયુર્યેઽથ તાન્
હત્વા શૃઙ્ગખુરાસ્યપુચ્છવલનૈસ્ત્રસ્તત્રિલોકીજનમ્ ।
આક્રમ્ય પ્રપદેન તં ચ મહિષં શૂલેન કણ્ઠેઽભિનદ્-

યા મધ્વારુણનેત્રવક્ત્રકમલા તામસ્મિ લક્ષ્મીં ભજે ॥ ૩॥

બ્રહ્મા વિષ્ણુમહેશ્વરૌ ચ ગદિતું યસ્યાઃ પ્રભાવં બલં
નાલં સા પરિપાલનાય જગતોઽસ્માકં ચ કુર્યાન્મતિમ્ ।
ઇત્થં શક્રમુખૈઃ સ્તુતાઽમરગણૈર્યા સંસ્મૃતાઽઽપદ્વ્રજં
હન્તાઽસ્મીતિ વરં દદાવતિશુભં તામસ્મિ લક્ષ્મીં ભજે ॥ ૪॥

ભૂયઃ શુમ્ભનિશુમ્ભપીડિતસુરૈઃ સ્તોત્રં હિમાદ્રૌ કૃતં
શ્રુત્વા તત્ર સમાગતેશરમણીદેહાદભૂત્કૌશિકી ।
યા નૈજગ્રહણેરિતાય સુરજિદ્દૂતાય સન્ધારણે
યો જેતા સ પતિર્મમેત્યકથયત્તામસ્મિ વાણીં ભજે ॥ ૫॥

તદ્દૂતસ્ય વચો નિશમ્ય કુપિતઃ શુમ્ભોઽથ યં પ્રેષયત્
કેશાકર્ષણવિહ્વલાં બલયુતસ્તામાનયેતિ દ્રુતમ્ ।
દૈત્યં ભસ્મ ચકાર ધૂમ્રનયનં હુઙ્કારમાત્રેણ યા
તત્સૈન્યં ચ જઘાન યન્મૃગપતિસ્તામસ્મિ વાણીં ભજે ॥ ૬॥

ચણ્ડં મુણ્ડયુતં ચ સૈન્યસહિતં દૃષ્ટ્વાઽઽગતં સંયુગે
કાલ્યા ભૈરવયા લલાટફલકાદુદ્ભૂતયાઘાતયત્ ।
તાવાદાય સમાગતેત્યથ ચ યા તસ્યાઃ પ્રસન્ના સતી
ચામુણ્ડેત્યભિધાં વ્યધાત્ત્રિભુવને તામસ્મિ વાણીં ભજે ॥ ૭॥

શ્રુત્વા સંયતિ ચણ્ડમુણ્ડમરણં શુમ્ભો નિશુમ્ભાન્વિતઃ
ક્રુદ્ધસ્તત્ર સમેત્ય સૈન્યસહિતશ્ચક્રેઽદ્ભુતં સંયુગમ્ ।
બ્રહ્માણ્યાદિયુતા રણે બલપતિં યા રક્તબીજાસુરં
ચામુણ્ડા પરિપીતરક્તમવધીત્તામસ્મિ વાણીં ભજે ॥ ૮॥

દૃષ્ટ્વા રક્તજનુર્વધં પ્રકુપિતૌ શુમ્ભો નિશુમ્ભોઽપ્યુભૌ
ચક્રાતે તુમુલં રણં પ્રતિભયં નાનાસ્ત્રશસ્ત્રોત્કરૈઃ ।
તત્રાદ્યં વિનિપાત્ય મૂર્ચ્છિતમલં છિત્ત્વા નિશુમ્ભં શિરઃ
ખડ્ગેનૈનમપાતયત્સપદિ યા તામસ્મિ વાણીં ભજે ॥ ૯॥

શુમ્ભં ભ્રાતૃવધાદતીવ કુપિતં દુર્ગે ત્વમન્યાશ્રયાત્
ગર્વિષ્ઠા ભવ મેત્યુદીર્ય સહસા યુધ્યન્તમત્યુત્કટમ્ ।
એકૈવાઽસ્મિ ન ચાપરેતિ વદતી ભિત્ત્વા ચ શૂલેન યા
વક્ષસ્યેનમપાતયદ્ભુવિ બલાત્તામસ્મિ વાણીં ભજે ॥ ૧૦॥

દૈત્યેઽસ્મિન્નિહતેઽનલપ્રભૃતિભિર્દેવૈઃ સ્તુતા પ્રાર્થિતા
સર્વાર્તિપ્રશમાય સર્વજગતઃ સ્વીયારિનાશાય ચ ।
બાધા દૈત્યજનિર્ભવિષ્યતિ યદા તત્રાવતીર્ય સ્વયં
દૈત્યાન્નાશયિતાસ્મ્યહં વરમદાત્તામસ્મિ વાણીં ભજે ॥ ૧૧॥

યશ્ચૈતચ્ચરિતત્રયં પઠતિ ના તસ્યૈધતે સન્તતિ-
ર્ધાન્યં કીર્તિધનાદિકં ચ વિપદાં સદ્યશ્ચ નાશો ભવેત્ ।
ઇત્યુક્ત્વાન્તરધીયત સ્વયમહો યા પૂજિતા પ્રત્યહં
વિત્તં ધર્મમતિં સુતાંશ્ચ દદતે તામસ્મિ વાણીં ભજે ॥ ૧૨॥

ઇત્યેતત્કથિતં નિશમ્ય ચરિતં દેવ્યાઃ શુભં મેધસા-
રાજાસૌ સુરથઃ સમાધિરતુલં વૈશ્યશ્ચ તેપે તપઃ ।
યા તુષ્ટાઽત્ર પરત્ર જન્મનિ વરં રાજ્યં દદૌ ભૂભૃતે
જ્ઞાનં ચૈવ સમાધયે ભગવતીં તામસ્મિ વાણીં ભજે ॥ ૧૩॥

દુર્ગાસપ્તશતીત્રયોદશમિતાધ્યાયાર્થસઙ્ગર્ભિતં
દુર્ગાસ્તોત્રમિદં પઠિષ્યતિ જનો યઃ કશ્ચિદત્યાદરાત્ ।
તસ્ય શ્રીરતુલા મતિશ્ચ વિમલા પુત્રઃ કુલાલઙ્કૃતિઃ
શ્રીદુર્ગાચરણારવિન્દકૃપયા સ્યાદત્ર કઃ સંશયઃ ॥ ૧૪॥

વેદાભ્રાવનિસમ્મિતા ૧૦૪ નવરસા ૬૯ વર્ણાબ્ધિતુલ્યાઃ ૪૪ કરામ્નાયા ૪૨
નન્દકરેન્દવો ૧૨૯ યુગકરાઃ ૨૪ શૈલદ્વયો ૨૭ ઽગ્ન્યઙ્ગકાઃ ૬૩
ચન્દ્રામ્ભોધિસમા ૪૧ ભુજાનલમિતા ૩૨ બાણેષવો ૫૫ ઽબ્જાર્ણવા ૪૧
નન્દદ્વન્દ્વ ૨૯ સમા ઇતીહ કથિતા અધ્યાયમન્ત્રાઃ ક્રમાત્ ॥ ૧૫॥

શ્રીમત્કાશીકરોપાખ્યરામકૃષ્ણસુધીકૃતમ્ ।
દુર્ગાસ્તોત્રમિદં ધીરાઃ પશ્યન્તુ ગતમત્સરાઃ ॥ ૧૬॥

ઇતિ શ્રીકાશીકરોપનામક અનન્તભટ્ટપુત્રરામકૃષ્ણભટ્ટવિરચિત
શ્રીદુર્ગાસપ્તશતીસારભૂતદુર્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*saptashatIsArabhUtadurgAstotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*